अदृश्यानां देवादीनां गगनोद्भवे वचने आकाशवाण्याम् ।

**आकाशमण्डल** न० आकाशोमण्डलमिव । १नभोमण्डले आकाशस्य निरयवत्वेन अनवच्छिन्नत्वेन च वेष्टनाकार मण्डलाभावेऽपि भूगोलवृत्तोपाधिकृतं तदीयं मण्डलमिव भवति। योहि नभोभागो भूगोलेनानावृतः सन् दृष्टिप्रचार पथवर्त्त्यालोकवान् तस्यैव भूगोलोपाधिना गोलाकारत्वं कल्प्यते। एतेनापि प्रमाणेन भूमेर्गोलाकारत्वानुमानम् यदि भूमिर्गोलाकारा न स्यात् कथं तदाऽनन्तानवच्छिन्नस्याकाशस्य गोलाकारत्वमुपलभ्येत कस्यचिदुपाधेरेव च स्वभावात् तस्य गोलाकारत्वमुपलभ्यते इति कल्प्यम् अन्यस्य च परिधेरदर्शनात् परिशेषात् भुमेरेव तथात्वसिद्धिरिति तस्या गोलाकारता तद्वशाच्चाकाशस्य तथात्वकल्पनमिति "आकाशमण्डलमध्यमध्यास्ते" काद० नभोमण्डलादयोऽप्यत्र 'नैतन्नभोमण्डलमम्बुराशिः" सा०द० तन्त्रोक्ते भूतशुद्धौ चिन्तनीये भ्रूमध्यावधिब्रह्मरन्ध्रान्तस्थिते वृत्ताकारे स्वच्छे २नभोमण्डले च "वृत्तं द्विवस्तत् षड्विन्दुलाञ्छितं मातरिश्वनः" तन्त्र०। पदार्थादर्शे, भूतशुद्धौ वायोराकाशे विलापनमभिधाय 'ततोभ्रूमध्यादि ब्रह्मरन्ध्रपर्य्यन्तं स्वच्छं वर्त्तुलमाकाशमण्डलम्" इत्युक्तम् । तदेव मण्डलं विद्वेषे चिन्तनीयम् यथोक्तं "जलस्य मण्डलं प्रोक्त"मित्युपक्रम्य "वृत्तं द्विवस्तद्विद्वेषे" मन्त्रमहो० ।

**आकाशमय** पु० आकाश+प्रायार्थे मयट् । आकाशप्राये आत्मनि । "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयः चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमयः अम्मयः पृथिवीमयः" शत०ब्रा० । "योऽयमात्मनः संसारसंबन्धः स वास्तवो न भवति किन्त्वौपाधिक एवेति तदुपाधीन् दर्शयितुमात्मनो वास्तवरूपमाह स वा इति। स प्रकृतः संसारी अयमविद्यातत्कार्य्य विनिर्मुक्तः स्वप्रकाशोऽपरोक्षः आत्मा कूटस्थःसाक्षी चिद्धातुरेवभूतः सोऽयमात्मा वै ब्रह्म अशनायाद्यतीतः परमात्मैव । ब्रह्मैव सन्नयमात्माऽविद्ययाऽब्रह्मवत् प्रतिपन्नः पुनः सम्यग्ज्ञानात्तत्प्रध्वंसे ब्रह्मैवावतिष्ठतइति भावः। इदानीं यत्प्रयुक्तमेवंविधब्रह्मात्मनो बन्धस्तानुपाधीनाह विज्ञानमय इति विज्ञानं बुद्धिस्तत्प्रायः बुद्धेरैक्याध्यासाद्धि तद्धर्म्मस्य कर्त्तृत्वादेरात्मनि आरोपितत्वं तत्प्रायत्वम् । अस्मिन् प्रकरणे सर्वोऽपि मयट् प्रायार्थे न तु विकारार्थे तत्र तदसम्भवात्" शा०भाष्यम् । [ राजनि० ।

**आकाशमांसी** स्त्री आकाशभवा मांसी । क्षुद्रजटामांस्याम्

**आकाशमूली** स्त्री आकाशे भूमिशून्यदेशे मूलमस्याः ङीप् । कुम्भिकायाम् (पाना) ।

**आकाशयान** न० आकाशे यायते ऽनेन या—करणे ल्युट् ७त० । आकाशगमनसाधने विमाने ।

**आकाशरक्षिन्** पु० आकाशे इव अत्युच्चप्राचीरोपरि स्थितः सन् रक्षति रक्ष–णिनि । दुर्गबहिःप्राचीरोपरिस्थिते रक्षके । "सञ्चारोयत्र लोकानां दूराद्देवाववुध्यते। प्रगण्डी सा च विज्ञेया बहिःप्राकारसंज्ञिता । प्रणिधिस्तत्र यत्नेन कर्त्तव्यो भूतिमिच्छता । स एवाकाशरक्षीति हृग्रच्यते शास्त्रकोविदैः" । भा०शा०अ०६८ व्या०नी०क० ।

**आकाशवचन** न० आकाशे वचनम् । पात्राप्रवेशेऽपि तदीयवाक्यं प्रविष्टपात्रेण श्रुत्वा आकाशवाक्यत्वेन कल्प्यते नाटकाङ्गे १वाक्यभेदे "नेपथ्योक्तं श्रुतं तत्र आकाशवचनं तथा । समाश्रित्यापि कर्त्तव्यमाकुखं नाटकादिषु" सा०द० । अलक्षितशरीरतया देवादिभिरुच्चार्य्यमाणे २वाक्ये च ।

**आकाशवत्** त्रि० आकाशः गम्यतयाऽस्त्यस्य मतुप् मस्य वः स्त्रियां ङीप् । आकाशगामिनि "प्रतिगृह्य दक्षिणमूरूमपाच्छाद्य तस्मिन् सादयित्वाऽकाशवतीभिरङ्गुलोरपिदध्यात्" आश्वला० श्रौ०सू० । [पथि ।

**आकाशवर्त्मन्** न० आकाशोवर्त्मेव गम्यत्वात् । आकाशरूपे

**आकाशवल्ली** स्त्री आकाशस्य वल्ली शाखेव अत्युच्चशिखत्वात् । (अमरवेल इति) ख्यातायां लतायाम् राजनि० ।

**आकाशवाणी** स्त्री आकाशे भवा वाणी । अदृश्योत्पादकपुरुषत्वेनाकाशादिवोत्पन्नायां देवादिवाचि ।

**आकाशसलिल** न० आकाशात् पतितं सलिलम् । आकाशात् पतिते जले । तच्च चतुर्विधं मेघादिधारानिसृतं धारं, चन्द्रकरतआगतं कारम्, तुषारकृतं तौषारम्, संहतहिमखण्डेननिर्वृत्तं च हैमम् । तच्च सुश्रुते दर्शितम् अम्बुशब्दे २३० पृष्ठे उक्तम् ।

**आकाशस्फटिक** पु० आकाशेभवः स्फटिकइव । वर्षोपले करकाख्ये संहतजलखण्डे । तदुत्पादविलयौ श्रीपतिराह । "उद्धूतैः पांशुभिर्भूमेः प्रचण्डपवनोच्चयात् । मेघमण्डलमानीतैर्मालिन्यपरिवर्ज्जितैः । मिश्रणाज्जलविन्दूनां पिण्डभावोभवेदिह । दृषद्वन्निपतन्त्येते द्रवन्ते च पुनःक्षितौ" ।

**आकाशास्तिकाय** पु० कर्म्म०अर्हन्मतसिद्धे जीवभिन्ने आवरणाभावरूपे पदार्थभेदे । सच अर्हच्छब्दे ३८२ पृष्ठे दर्शितः